ISSN 2277 - 5730
AN INTERNATIONAL MULTIDISCIPLINARY
QUARTERLY RESEARCH JOURNAL

# AJANTA

Volume - XI Issue - III July - September - 2022

English / Marathi / Hindi Part - I

**Peer Reviewed Refereed
and UGC Listed Journal
Journal No. 40776**

ज्ञान विज्ञान विमुक्तये

IMPACT FACTOR / INDEXING
2020 - 6.306
www.sjifactor.com

❖ EDITOR ❖
Asst. Prof. Vinay Shankarrao Hatole
M.Sc (Maths), M.B.A. (Mktg.), M B A (H.R.),
M.Drama (Acting), M.Drama (Prod. & Dir.), M.Ed

❖ PUBLISHED BY ❖

Ajanta Prakashan
Aurangabad. (M.S.)

VOLUME - XI, ISSUE - III - JULY - SEPTEMBER - 2022
AJANTA - ISSN 2277 - 5730 - IMPACT FACTOR - 6.306 (www.sjifactor.com)

# ८. बौद्धदर्शनमतरीत्या मनः

**Dr. Bhaskar Bhatt Joshi**
Assistant Professor, HOD, DPT of Nyaya & Vaisheshika, Karnataka Sanskrit University
Chamrajpete, Bangaluru

प्रपञ्चेऽस्मिन् स्वीयपरम्परावैशिष्ट्येन भासते भारतं नाम कर्मधर्मभूमिः । इदम् भारतं दर्शनानाम् आकरः । किमिदं दर्शनम् ? दृश्यते अनेन इति दर्शनम् । भरतीयदर्शनानां[1] किं वा लक्ष्यम् इति चेत् इत्थमामनन्ति दार्शनिकाः, येन साधनेन इदं विश्वम् इदं वस्तुजातम्, जीवात्मा प्रकृतिश्च यथागथ्येन दृश्यते, समीक्षते तद्दर्शनम्। अतः समग्रमपि आध्यात्मिकम्, आधिभौतिकं च विवेचनं दर्शनशब्दान्तरगतम् । तेन च परमपुरुषार्थस्य परमसुखरूपस्य प्राप्तिः तदुपायज्ञानद्वारा भावति, तदर्थं च बहवः विचाराः कर्तव्याः भवन्ति ।

जगति किं शाश्वतं तत्त्वम् ? जीवत्मनः किं स्वरूपम् ? कः पुनर्जायते ? कः सृष्टेः कर्ता ? किं जीवनस्य कर्तव्यम् ? कति पदार्थाः ? के चते ? तेषां ज्ञानेन किं वा प्राप्तिः इत्यादयः । एतेषां प्रश्नानां समाधनप्रदर्शनमेव दर्शनमिति वक्तुं शक्यते । सूक्ष्मेक्षिकया तत्त्वार्थदर्शनमेव (यथार्थदर्शनमेव) दर्शनम । समान्येषु सामान्याः दार्शनिकाः आमनन्ति इत्थम -

इन्द्रियैरुपलब्ध्ं यत तत तत्त्वेन भवेद्यपि ।

जातस्तत्त्वविदो वालाः तत्त्वज्ञानेन किं कदा[2]। ॥ 1

भारतीयदर्शनानि स्थूलरूपेण द्वेधा विभज्यन्ते । आस्तिकदर्शनानि नास्तिकदर्शनानि च इति । यानि दर्शनानि वेदानां प्रामाण्यमङ्गीकृत्य पूर्वोक्तविचारं कुर्वन्ति तानि आस्तिकदर्शनानि । यानि च वेदानं प्रामाण्यं नाङ्गीकुर्वन्ति अपि तु केवलेन प्रत्यक्षिकज्ञानेन अनुमानेन वा जगत्तत्त्वम् आत्मतत्त्वं विचार्य निर्णयन्ति तानि नास्तिकदर्शनानि तत्र न्यायवैशेपिकसाङ्ख्ययोगमीमांसावेदान्ताख्यानि षड्दर्शनानि आस्तिकदर्शनानि । चार्वाक जैनबौद्धादिदर्शनानि च नास्तिकदर्शनानीति प्रथितानि। तेषु नास्तिकदर्शनेषु अन्यतम दर्शनं बौद्धदर्शनम।

बौद्धाः सौत्रान्तिक वैभाषिक योगाचर माध्यमिकभेदेन चतुर्विधास्सन्ति। एते सर्वेऽपि मनसः अस्तित्वं प्राधान्यञ्च बहुमुखतया प्रतिपादयन्ति। मनः चित्तं विज्ञानं विज्ञप्तिश्चेति समानार्थकश्शब्दाः। मनः द्वादशायतन्तर्गतम। तच्च बुद्धिव्यतिरिक्तमिति तेषामभिप्रायः। सर्वदर्शनसङ्ग्रहकारेणैवमुक्तम्, ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः ॥इति ।

योगाचारमतानुयायिनः काम, रूप अरूपधातु त्रयात्मकः प्रपञ्चः विज्ञानरूपमेवेति कथयन्ति। बौद्धानां नये मनः ननित्यमपि तु क्षणिकमेव। तच्च शीघ्रं चलति। मनसः शीघ्रगमने प्रतिघाताः न सम्भवन्ति।

नियतविषयकानां चक्षुरादीनामाश्रयमालम्बनञ्च प्रसिद्धम्। मनस्त्वनियतविषयकत्वात् क्षिप्रत्वाच्च आश्रयं आलम्बनं वा न प्रसिद्धम्। विज्ञानं निरालम्बनं न तिष्ठतीति तस्य आलयविज्ञानमेवाश्रयत्वेन कल्प्यते। तदुक्तं "तदालम्ब्य मनो नामविज्ञानं मननात्मकम्" इति मननस्वभावात्मकत्वादेव मनसः मनश्शब्दव्यपदेशः।

बौद्धेषु सौत्रान्तिकानां मते मनः[3] इन्द्रियं भवति । ते च द्वाविंशति संख्याकानि इन्द्रियाणि कथयन्ति। सौत्रान्तिकमतानुयायी हरिवर्मा स्वीये सत्यसिद्धिशास्त्रे- "तथागतः संसारस्थितिप्रवृत्ति निवृत्ति व्यवदानार्थकत्वेन द्वाविंशतीन्द्रियाण्यवोचत्" इति। तथागतस्याभिप्रायम् विशदीचकार । द्वाविंशतीन्द्रियाणि तु सत्यसिद्धिशास्त्रग्रन्थस्य सम्पादकैर्यास्वामिशास्त्रिभिरेवं नामतो निर्दिष्टानि चक्षुस्-श्रोत्र घ्राण- जिह्वा- काम- मनस्- स्त्री-पुरुष- जीवित सुख दुःख- सौमनस्य- दौर्मनस्य- उपेक्षा श्रद्धा-वीर्यस्मृति- समाधि- प्रज्ञा- अनाज्ञात- ज्ञास्यामि आज्ञा- अज्ञातावन्द्रिय[4] इति ।

हरिवर्मणैव स्वयमुद्घोषितमिन्द्रियत्वं मनसः- सर्वस्त्वानामाद्यशरीरानुभवो विज्ञानमूलकः। तद्विज्ञानं चक्षुरादिभ्यः षोढा समुत्पद्यते इति षडिन्द्रियाण्युच्यन्ते यत् चक्षुरिन्द्रियं यावत मन इन्द्रियमिति । षड् विज्ञानजनकत्वादिन्द्रियाणि षडेव इति । मनः क्षणिकं भवति न तु स्थिरम् । तच्च प्रतिक्षणं उत्पद्यते विनश्यति चेति सौत्रान्तिकानामभिप्रायः ।

आशुसञ्चारि मनः क्रमेणैवेन्द्रियैस्संयुज्याऽपि युगपत् ज्ञानोत्पत्तिभ्रमं कल्पवतीति वैशेषिकाः नैयायिकाश्च मनसः शीघ्रचलनत्वं यद्वदन्ति तन्निकर्तुं हरिवर्मणा बहुवउपायाः प्रदर्शिताः । तद्यथा-

यदवादीः मनः सञ्चरतीति। तदयुक्तम्। कस्मात्। मनः प्रतिक्षणमुत्पन्न विनाशि वायुवत् कर्मवद्वा । प्रतिक्षणोत्पन्नविनाशिधर्मस्य नास्ति गति लक्षणम् । किञ्च मनो गच्छतीति किं ज्ञात्वा गच्छेत् । उताज्ञात्वा गच्छेत् । तदुभयमयुक्तम् । यदि पूर्वमेव ज्ञातवत् किं गमनेन । यद्यज्ञातवत् किमर्थं गमनम् ? यदि चित्तं चक्षुषि वर्तते । कथं कर्णं प्राप्नोति। यत् चित्तं मन्यते श्रोत्रं गमिष्यामीति तत् श्रोत्रस्मरणम । या शब्दशुश्रूषा सेव शब्दस्मृतिः। यदि चक्षुषि वर्तमानं चित्तं न तदा (श्रोत्र) स्मरणं भवति । एवमिन्द्रियान्तरेऽपि । अतो मनो न गच्छति । यः पुमान् पूर्वं नगरादीन् दृष्टवान स इदानीं पूर्वमनुरुध्य स्मरति न जानाति प्रत्युत्पन्नान् । अतो मनो न गच्छति । यदि (मनो) धर्मोगच्छति, पूर्वसन्निकृष्टं पश्चाद्विप्रकृष्टं (गच्छेत) इदानीन्तु सन्निकृष्टं विप्रष्टञ्च युगपत स्मरति । अतो ज्ञायते न गच्छतीति । यो धर्मो गच्छति सोऽन्तराले सर्वान विषयान जानीयात्। यथा कश्चित् सञ्चरन् मध्येमार्गं रूपादीन पदार्थान् जानाति । न तथा मनः। यथा चित्तमसदपि जानति यदृतातीलमनागतं शशशृ कुर्मरोमाहिपादं वायुरूपं लोहितलवणगन्धमित्यादीनि (सर्वाण्यपि) जानाति। सर्वेषामप्राप्तत्वात्। अतो ज्ञायते न मनो गच्छतीति। यदि चिन्तमालम्बनं प्राप्नोति तदा अज्ञानसंशयज्ञान मिथ्याज्ञानानि न स्युः। वस्तुतस्तु सन्ति तानि। अतो ज्ञायते न गच्छतीति। चित्तस्यालम्बनं निर्वाणं चित्तं यदि प्राप्नोति संस्कृतेनासंस्कृतं प्राप्यते। तत्तु न युक्तम् । पुनरावृत्ति निसारण (लक्षण)मसंस्कृतं संस्कृते प्रविशतीदमप्युक्तम्। यदि परलोकोऽस्तीति स्मरति। तदा चित्तं परलोकम् प्राप्नोति तत्कायो मृतो भवेत्। न पुरुज्जीवेत्। अतो न गच्छति। चित्तमनागतं स्मरदनागतं प्राप्नोति। न हि प्रत्युत्पन्नो

धर्मोऽनुगतो भवेत्। अतीतं स्मरचिन्तमतीते वर्तते न ह्यतीतगतो धर्मः प्रत्युत्पन्नः स्यात। अतो ज्ञायते नगच्छतीति। रागचित्तात मुखे रूपान्तरमुत्पद्यते। तथा द्वेषादिभ्योऽपि। यदि चित्तं देशान्तरम प्राप्नोति। तदा रूपभेदो न स्यात। अतो ज्ञायते न गच्छतीति। किञ्चालम्बनस्थं चित्तं वेदेनेत्युच्यते। ता वेदनास्तिस्रः- दुःखा वा सुखा वा अदुःखसुखा वेति । यदि चित्तं प्रदेशान्तरम प्राप्नोति तदा ता वेदना न स्युः । अतो न गच्छति । चित्तश्च कायनिश्रितम । यथोक्तं सूत्रे नामरूपाश्रितं विज्ञानमिति । अतः कार्यं विहाय नान्यत्र गच्छति । कायश्च विज्ञानसंयुक्तस्सन् काय इत्युच्यते । यदि चित्तं देशान्तरे वर्तते । कायो निर्विज्ञानः स्यात । आलम्बनं विज्ञानसंयुक्त पुनः सविज्ञानमित्युच्यते अतो न गच्छति । स्वप्ने चित्तमन्या दिशो न गच्छति । मैवम् स्वप्ने शुक्रस्खलनादि चेष्टितानि सर्वाणि कायगतानि । चित्तविपर्ययादन्यत्र दिशि वर्तते इति वदन्ति । न तु वस्तुतो गच्छति । स्वप्ने च क्रियाः सर्वास्ता मिथ्याः । यथा कश्चित स्वप्ने पिबति नैव तत तृष्णामनयति । स्वप्ने च (पाप) कर्मचर्यादिनपातकं भवति । अतः मनोऽपि न गच्छति। चित्तं दृष्टे श्रुते मते ज्ञातं धर्ममात्रे वर्तते । न धर्मान्तरं चरति । यदि गमनेन प्राप्नोतितदा धर्मान्तरमपि जानीयात् । ऋद्धिप्रभावितं मनो गच्छति । अन्या दिशश्चप्राप्नोति ।इति ।

चित्तमेकमथवाऽनेकमितिविषये बहुधा विमृश्य समाधानरूपेण चित्तबहुत्वमेव प्रदर्शयति हरिवर्मा चित्तबहुत्वप्रदर्शनवर्गे ।

मनसो निश्चलत्वात् चक्षुरादिषु संयुक्तमन्यत्र न गच्छति । प्रतीन्द्रियमेकैकं चित्तमुत्पद्यते। तच्च क्षणिकं भवतीति शीघ्रमेव विनश्यति । "चित्तानिकिं क्षणिकानि उत किञ्चित् कलस्थायीनि। केचिदाहुः - किञ्चित् कालस्थायीनीति । कस्मात । रूपादीनां प्रत्यायनात्। यत क्षणिकं न तत प्रत्याययेत, अतो नास्थायि भवति" इति पूर्वपक्षं कृत्वा, चित्तं प्रत्यायकमित्यतोऽक्षणिकमिति । तदयुक्तम । चित्तगतनिमित्तानां बलात (चित्तं) प्रत्याययन्ति। न स्थायिबलात । इत्यादिना क्षणिकत्वम चित्तस्य साधयति । बहून्यपि चित्तानि एकस्मिन् क्षणे नोत्पद्यन्ते । तेषामुत्पत्तौ कश्चित क्रमोऽस्तीति विज्ञानान्यपि क्रमेणैव जायन्ते, न युगपत् । तदुक्तं सत्यसिद्धिशास्त्रस्य विज्ञानायौगपद्यवर्गे- "बहूनि विज्ञानानि युगपदेककालमुत्पद्यन्त इति । तदयुक्तम् कस्मात् । विज्ञान मनस्कारमेक्ष्योत्पद्यते । यथोक्तं सूत्रे- चक्षुरनुपहितम् भवति । रूपमाभासगतं भवति ।

सहायकग्रन्था

१. षड्दर्शनसमुच्चयः

२. सत्यसिद्धिशास्त्रम्

३. नागार्जुनभिक्षुः

४. अभिधर्मकोशम्

५. बौद्धधर्म-दर्शन

**Footnotes**

1. बौद्धं नैय्यायिकं सांख्यं जैनं वैशेषिकं तथा।

   जैमीनीयं च नामानि दर्शनानाममून्यहो॥३॥ षड्दर्शनसमुच्चयः

2. नागार्जुनभिक्षुः अ.

3. पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम।

   धर्मायतनमेतानि द्वादशायतनानि च॥८॥ षड्दर्शनसमुच्चयः

4. सत्यसिद्धिशास्त्रम्- चतुस्सात्यवर्गः- १-१७, पृ.सं-५५

5. सत्यसिद्धिशास्त्रम, मनोवर्गः २-५२

6. सत्यसिद्धिशास्त्रम्- चित्तबहुत्ववर्गः- २-६८